## क्त्वि स्कन्दिस्यन्दोः। (३१/३३२१)

क्त्वाप्रत्यये परतः स्कन्द स्यन्द इत्येतयो[1]र्नकारलोपो न भवति। स्कन्त्वा। स्यन्त्वा। स्यन्देरूदित्वात् (धा.पा. ७६१) पक्षे इडागमः (७.२.४४/२२७९)। स्यन्दित्वा। तत्र यदा इडागमः तदा 'न क्त्वा सेट्' (१.२.१८/३३२२) इति कित्त्वप्रतिषेधादेव नलोपाभावः॥

## जान्तनशां विभाषा। (३२/३३३०)

जान्ताना[2]मङ्गानां नशेश्च क्त्वाप्रत्यये परतः विभाषा नकारलोपो न भवति। रङ्क्त्वा, रक्त्वा[3]। भङ्क्त्वा, भक्त्वा। नश – नंष्ट्वा, नष्ट्वा। [4]इट्पक्षे नशित्वा॥

## भञ्जेश्च चिणि। (३३/२७८४)

भञ्जेश्च चिणि परतो विभाषा [5]नकारलोपो भवति। अभाजि, अभञ्जि। अप्राप्तोऽयं नलोपः पक्षे विधीयते, ततो न इति नानुवर्तते॥

## शास इदङ्हलोः। (३४/२४८६)

शास उपधाया इकारादेशो भवति अङि परतो हलादौ च क्ङिति। अन्वशिषत्, अन्वशिषताम्, अन्वशिषन्। हलादौ किति-शिष्टः। शिष्टवान्। ङिति – [6]आवां शिष्वः। वयं शिष्मः। इत्त्वे कृते 'शासिवसिघसीनां च' (८.३.६०/२४१०) इति षत्वम्। अङ्हलोः इति किम्? [7]शासति। शशासतुः। शशासुः।

[७८१] क्वौ च शास इत्त्वं भवतीति वक्तव्यम्। (म. भा. ३. १९५)

आर्यान् शास्ति इति आर्यशीः। [8]मित्रशीः। यस्मात् शासेः [9]अङ विहितः 'शासु अनुशिष्टौ' (धा. पा. १०७६) इति, तस्यैवेदं ग्रहणम् [10]इष्यते। '[11]आङः शासु इच्छायाम्' (धा. पा. १०२३) इति[12] अस्य न भवति। आशास्ते। आशास्यमानः।

[७८२] क्विप्प्रत्यये [13]तु तस्यापि भवतीति वक्तव्यम्। (म. भा. ३. १९५)

आशीः, आशिषौ, आशिषः। 'क्षियाशीःप्रैषेषु [14]तिङाकाङ्क्षम्' (८. २. १०४/३६२३) इति निपातनाद् वा सिद्धम्॥

---

1. नकारस्य लोपो क. 2. अङ्गानाम् नास्ति फ. 3. मङ्क्त्वा मक्त्वा इत्यधिकम् ह. 4. वाक्यमिदं नास्ति ब. क. 5. नलोपो फ. 6. तौ शिष्टः फ. ह. 7. शास्ति ड, शशास क. 8. नास्ति क. 9. इट क. 10. इष्यते नास्ति फ. 11. न त्वाङः फ. 12. एतस्य फ. 13. तु नास्ति फ. 14. तिङाकाङ्क्षायाम् फ.